कर्म्मकरास्तेषां दासास्त्रिपञ्चकाः। शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधिकर्म्मकृत्। एते कर्म्मकरा ज्ञेया दासास्तु गृहजादयः। सामान्यमस्वतन्त्रत्वमेषामाहुर्मनीषिणः। जातिकर्म्मकरस्तूक्तो विशेषोवृत्तिरेव च। कर्म्मापि द्विविधं ज्ञेयमशुभं शुभमेव च। अशुभं दासकर्म्मोक्तं शुभं कर्म्मकृतां स्मृतम्। गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम्। गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम्। अशुभङ्कर्म्म विज्ञेयं शुभमन्यदतः पर”मिति—“तत्र शिष्यो वेदविद्यार्थी। अन्तेवासी शिल्पादिषु। मूल्येन यः कर्म्म करोति स भृतकः। कर्म्मकुर्वतामधिष्ठाता अधिकर्म्मकृत्। अशुचिस्थानम् उच्छिष्टप्रक्षेपणार्थं गर्त्तादिकम्। अवस्करः गृहमार्जितपांश्वादिनिचयस्थानम्। उज्झनं त्यागः। भृतकश्चात्र त्रिविधः। तदुक्तम्“उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषीवलः। अधमो भारवाही स्यादित्येवन्त्रिविधो भृतः”इति।

कर्म्मकर्त्तृ पु० कर्म्मैव कर्त्ता। व्याकरणोक्ते कर्म्मणः कर्तृत्वविवक्षया प्राप्तकर्त्तृत्वभावे कर्म्मणि।“क्रियमाणन्तु यत् कर्म्म स्वयमेव प्रसिध्यति। सुकरैः स्वैर्गुणैः कर्त्तुः कर्म्मकर्त्तेति तद्विदुः” व्या०का०। कर्म्मकर्त्तरि च कार्य्यभेदातिदेशमाह “कर्म्मवत् कर्म्मणा तुल्यक्रियः” पा०। सि०कौ० विवृतमेतत् यथा

“कर्त्तरि तु कर्म्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्म्मवत्स्यात्। कार्य्यातिदेशोऽयम्। तेन यगात्मनेपदचिण्चिण्वदिटः स्युः। कर्त्तुरभिहितत्वात्प्रथमा। पच्यते ओदनः। भिद्यते काष्ठम्। अपाचि। अभेदि। ननु भावे लकारे कर्त्तुर्द्वितीया स्यादस्मादतिदेशादिति चेन्न लकारवाच्य एव कर्त्ता कर्म्मवत्। लिङ्याशिष्यङिति द्विलकारकात् इत्यनुवृत्तेः भावे प्रत्यये च कर्त्तुर्लकारेणानुपस्थितेः। अतएव कृत्यक्तखलर्थाः कर्म्मकर्त्तरि न भवन्ति किन्तु भावे एव। भेत्तव्यं कुसूलेन। ननु पचिभिद्योः कर्म्मस्था क्रिया विक्लित्तिर्द्विधाभवनञ्च। सैवेदानीङ्कर्त्तृस्था न तु तत्तुल्या? सत्यम्। कर्म्मत्वकर्त्तृत्वावस्थाभेदोपाधिकं तत्समानाधिकरणक्रियाया भेदमाश्रित्य व्यवहारः। कर्म्मणेति किम्? करणाधिकरणाभ्यां तुल्यक्रिये पूर्वोक्ते साध्वसिरित्यादौ मा भूत्। किञ्च—कर्त्तृस्थक्रियेभ्यो मा भूत्, गच्छति ग्रामः, आरोहति हस्ती, अधिगच्छति शास्त्रार्थः, स्मरति श्रद्दधाति वा। यत्र कर्म्मणि क्रियाकृतो विशेषो दृश्यते, यथा पक्वेषु तण्डुलेषु, यथा वा छिन्नेषु काष्ठेषु तत्र कर्म्मस्था क्रिया, नेतरत्र। न हि पक्वापक्वतण्डुलेष्विव गतागतग्रामेषु वैलक्षण्यमुपलभ्यते। करोतिरुत्पादनार्थः। उत्पत्तिश्च कर्म्मस्था, तेन कारिष्यते घट इत्यादि। यत्नार्थत्वे तु नैतत्सिध्येत्। ज्ञानेच्छादिवद्यत्नस्य कर्त्तृस्थत्वात् एतेन अनुव्यवसमानेऽर्थे” इति व्याख्यातम् इदमस्माभिः सरलायां व्याख्यातम् यथा—“उत्प्रवृत्तिमात्रे कर्त्तृत्वं सर्व्वत्रैवास्ति कारके। व्यापारभेदापेक्षायां करणत्वादिसम्भवः”इति वाक्यमनुरुन्धानः कर्त्तृत्वकर्म्मत्वादिकं व्यवस्थाप्य कार्य्यविशेषाय कर्म्मातिदेशसूत्रमवतारयति कर्त्तरि त्विति। कर्म्मस्थया कर्म्ममात्रस्थया क्रियया फलेन“फलव्यापारयोर्धातुः”इत्युक्तेः“धातोरर्थः क्रियोच्यते”इत्युक्तेश्चेत्यर्थः। तुल्यक्रियः समानाधिकरणक्रिय इत्यर्थः। किञ्च कर्म्मस्थभावकएव कार्य्यातिदेशार्थं कर्म्मणेति पदम्“कर्म्मस्थेऽपि च धात्वर्थे कर्म्मकर्त्ता च कर्म्मवत्। कर्त्तृस्थेऽपि च धात्वर्थे कर्म्मकर्त्ता च कर्त्तृवत्” इत्युक्तेः“कर्म्मस्थः पचतेर्भावः कर्म्मस्थाश्च भिदादयः”इत्युक्तेः भिदादयः कर्म्ममात्रस्थाः। गमनादयस्तु कर्त्तृस्थाः“कर्त्तृस्थो बुध्यतेर्भावः कर्त्तृस्थाश्च गमादयः”इत्युक्तेः।“व्यत्ययोबहुलम्लिङ्याशिष्यङिति” सूत्रयोः सन्निजातद्विलकारमध्ये एकलकारस्यानुवृत्तेरित्यर्थः। कृत्यक्तखलर्थाइत्यत्र क्तग्रहणं प्रायिकं स्विन्नोग्राम इत्यादौ कर्म्मकर्त्तरि क्तस्य दर्शनादिति बोध्यम्। वास्तविकभेदाभावेऽप्यौपाधिकभेदोऽस्तीत्याह कर्म्मत्वकर्त्तृत्वावस्थेति तथा चावस्थाभेदेन क्रियाभेदात् कर्त्तुः कर्म्मस्थक्रियया तुल्यक्रियत्वमिति भावः। नेतरत्रेति। “निर्व्वर्त्त्ये च विकार्य्ये च कर्म्मवद्भाव इष्यते। न तु प्राप्ये कर्म्मणीति सिद्धान्तोऽयं व्यवस्थितः”इतिहर्य्युक्तेः क्रियाकृतविशेषवतोरेव निर्व्वर्त्त्यविकार्य्ययोः कर्म्मवद्भावो न तु तद्रहिते प्राप्य इति सिद्धान्तो द्योतित इति भावः” अत्र च यथा बोधाधिक्यं तथा शब्द०प्र० उक्तं यथा

“अथ भिद्यते अभेदि कुसूलः स्वयमित्यादौ भिदाद्यनुकूलव्यापारवत्त्वरूपस्य तत्कर्तृत्वस्य कथं कुसूलादावन्वयः भिदादेः परस्मैपदित्वेन तदर्थधर्म्मितया कर्तृत्वबोधने पदान्तरस्यासामर्थ्यात् यगिणोर्विगुणत्वाच्चेत्यत आह। एकक्रियाधर्म्मितया कर्तृता कर्म्मतोभयोः। बोधने कर्म्मताकाङ्क्षापेक्ष्योत्सर्गतो भवेत्। कर्म्मताकाङ्क्षा कर्म्मतान्वयस्यैवानुकूला आत्मनेपदयगादिसमभिव्याहाररूपाकाङ्क्षा व्युत्पत्तिवैचित्र्यादपेक्षणीया न तु कर्तृत्वान्वयस्य परस्मैपदविकरणादिसन्दशरूपा यद्येवं तण्डुलचैत्रौ पच्येते इत्यपि प्रयोगः